# .. shrIkRiShNarakShAkavacham ..

# ॥ શ્રીકૃષ્ણરક્ષાકવચમ્ ॥

## Document Information

Text title : shrIkRiShNarakShAkavacham from Gargasamhita
File name : kRiShNarakShAkavachamgargasamhitA.itx
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Vishwas Bhide vrbhide at rediffmail.com
Proofread by : Vishwas Bhide, PSA Easwaran psaeaswaran at gmail.com
Description-comments : gargasamhitA
Acknowledge-Permission: Vishwas Bhide http://satsangdhara.net/
Latest update : February 3, 2016
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીકૃષ્ણરક્ષાકવચમ્ ॥

ગોપ્ય ઊચુઃ -
શ્રીકૃષ્ણસ્તે શિરઃ પાતુ વૈકુણ્ઠઃ કણ્ઠમેવ હિ ।
શ્વેતદ્વીપપતિઃ કર્ણૌ નાસિકાં યજ્ઞરૂપધૃક્ ॥ ૧॥

નૃસિંહો નેત્રયુગ્મં ચ જિહ્વાં દશરથાત્મજઃ ।
અધરાવવતાં તે તુ નરનારાણાવૃષી ॥ ૨॥

કપોલૌ પાતુ તે સાક્ષાત્સનકાદ્યાઃ કલા હરેઃ ।
ભાલં તે શ્વેતવારાહો નારદો ભ્રૂલતેઽવતુ ॥ ૩॥

ચિબુકં કપિલઃ પાતુ દત્તાત્રેય ઉરોઽવતુ ।
સ્કન્ધૌ દ્વાવૃષભઃ પાતુ કરૌ મત્સ્યઃ પ્રપાતુ તે ॥ ૪॥

દોર્દણ્ડં સતતં રક્ષેત્પૃથુઃ પૃથુલવિક્રમઃ ।
ઉદરં કમઠઃ પાતુ નાભિં ધન્વન્તરિશ્ચ તે ॥ ૫॥

મોહિની ગુહ્યદેશં ચ કટિં તે વામનોઽવતુ ।
પૃષ્ઠં પરશુરામશ્ચ તવોરૂ બાદરાયણઃ ॥ ૬॥

બલો જાનુદ્વયં પાતુ જઙ્ઘે બુદ્ધઃ પ્રપાતુ તે ।
પાદૌ પાતુ સગુલ્ફૌ ચ કલ્કિર્ધર્મપતિઃ પ્રભુઃ ॥ ૭॥

સર્વરક્ષાકરં દિવ્યં શ્રીકૃષ્ણકવચં પરમ્ ।
ઇદં ભગવતા દત્તં બ્રહ્મણે નાભિપઙ્કજે ॥ ૮॥

બ્રહ્મણા શમ્ભવે દત્તં શમ્ભુર્દુર્વાસસે દદૌ ।
દુર્વાસાઃ શ્રીયશોમત્યૈ પ્રાદાચ્છ્રીનન્દમન્દિરે ॥ ૯॥

અનેન રક્ષાં કૃત્વાસ્ય ગોપીભિઃ શ્રીયશોમતી ।

ઇતિ ગર્ગસંહિતાયાં ગોલોકખણ્ડે ત્રયોદશાધ્યાન્તર્ગતં
ગોપીભિઃ કૃતં શ્રીકૃષ્ણરક્ષાકવચમ્ ।

Garga Samhita, Golokakhanda, Adhaya 13 verses 15-23
Encoded by Vishwas Bhide vrbhide at rediffmail.com http://satsangdhara.net/
Proofread by PSA Easwaran psaeaswaran at gmail.com

was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*